# .. hAkinIsahasranAmastotra ..

# ॥ हाकिनीसहस्रनामस्तोत्र ॥

श्रीगणेशाय नमः ।
श्री आनन्दभैरव उवाच ।
आनन्दार्णवमध्यभावघटितश्रौतप्रवाहोज्ज्वले
कान्ते दत्तसुशान्तिदे यमदमाह्लादैकशक्तिप्रभे ।
स्नेहानन्दकटाक्षदिव्यकृपया शीघ्रं वदस्वाद्भुतं
हाकिन्याः शुभनाम सुन्दरसहस्राष्टोत्तरं श्रीगुरोः ॥ १ ॥
श्री आनन्दभैरवी उवाच
साक्षात्ते कथयामि नाथ सकलं पुण्यं पवित्रं गुरो
नाम्नां शक्तिसहस्रनाम भाविकं ज्ञानादि चाष्टोत्तरम् ।
योगीन्द्रैर्जयकाङ्क्षिभिः प्रियकलाप्रेमाभिलाषार्चीतैः
सेव्यं पाठ्यमतीव गोप्यमखिले शीघ्रं पठस्व प्रभो ॥ २ ॥
अस्य श्रीपरनाथमहाशक्तिहाकिनीपरमेश्वरीदेव्यष्टोत्तरसहस्रनाम्नः
स्तोत्रस्य सदाशिव ऋषिः , गायत्रीच्छन्दः ,
श्रीपरमेश्वरीहाकिनीमहाशक्तिर्देवता , क्लीं बीजं , स्वाहा शक्तिः ,
सिद्धलक्ष्मीमूलकीलकं , देहान्तर्गत महाकायज्ञानसिद्ध्यर्थे जपे विनियोगः ।
ॐ हाकिनी वसुधा लक्ष्मी परमात्मकला परा ।
परप्रिया परातीता परमा परमप्रिया ॥ ३ ॥
परेश्वरी परप्रेमा परब्रह्मस्वरूपिणी ।
परन्तपा परानन्दा परनाथनिसेविनी ॥ ४ ॥
पराकाशस्थिता पारा पारापारनिरूपिणी ।
पराकाङ्क्ष्या पराशक्तिः पुरातनतनुः प्रभा ॥ ५ ॥
पञ्चाननप्रिया पूर्वा परदारा परादरा ।
परदेशगता नाथा परमाह्लादवर्धिनी ॥ ६ ॥
पार्वती परकुलाख्या पराञ्जनसुलोचना ।
परंब्रह्मप्रिया माया परंब्रह्मप्रकाशिनी ॥ ७ ॥
परंब्रह्मज्ञानगम्या परंब्रह्मेश्वरप्रिमया ।
पूर्वातीता परातीता अपारमहिमस्थिता ॥ ८ ॥
अपारसागरोद्धारा अपारदुस्तरोद्धरा ।
परानलशिखाकारा परभ्रूमध्यवासिनी ॥ ९ ॥
परश्रेष्ठा परक्षेत्रवासिनी परमालिनी ।
पर्वतेश्वरकन्या च पराग्निकोटिसम्भवा ॥ १० ॥
परच्छाया परच्छत्रा परच्छिद्रविनिर्गता ।

परदेवगतिः प्रेमा पञ्चचूडामणिप्रभा ॥ ११ ॥
पञ्चमी पशुनाथेशी त्रिपञ्चा पञ्चसुन्दरी ।
पारिजातवनस्था च पारिजातस्रजप्रिया ॥ १२ ॥
परापरविभेदा च परलोकविमुक्तिदा ।
परतापानलाकारा परस्त्री परजापिनी ॥ १३ ॥
परास्त्रधारिणी पूरवासिनी परमेश्वरी ।
प्रेमोल्लासकरी प्रेमसन्तानभक्तिदायिनी ॥ १४ ॥
परशब्दप्रिया पौरा परामर्षणकारिणी ।
प्रसन्ना परयन्त्रस्था प्रसन्ना पद्ममालिनी ॥ १५ ॥
प्रियंवदा परत्राप्ता परधान्यार्थवर्धिनी ।
परभूमिरता पीता परकातरपूजिता ॥ १६ ॥
परास्यवाक्यविनता पुरुषस्था पुरञ्जना ।
प्रौढा मेयहरा प्रीतिवर्धिनी प्रियवर्धिनी ॥ १७ ॥
प्रपञ्चदुःखहन्त्री च प्रपञ्चसारनिर्गता ।
पुराणनिर्गता पीना पीनस्तनभवोज्ज्वला ॥ १८ ॥
पट्टवस्त्रपरीधाना पट्टसूत्रप्रचालिनी ।
परद्रव्यप्रदा प्रीता परश्रद्धा परान्तरा ॥ १९ ॥
पावनीया परक्षुब्धा परसारविनाशिनी ।
परमेव निगूढार्थतत्त्वचिन्ताप्रकाशिनी ॥ २० ॥
प्रचुरार्थप्रदा पृथ्वी पद्मपत्रद्वयस्थिता ।
प्रसन्नहृदयानन्दा प्रसन्नासनसंस्थिता ॥ २१ ॥
प्रसन्नरत्नमालाढ्या प्रसन्नवनमालिनी ।
प्रसन्नकरुणानन्दा प्रसन्नहृदयस्थिता ॥ २२ ॥
पराभासरता पूर्वपश्चिमोत्तरदक्षिणा ।
पवनस्था पानरता पवनाधारविग्रहा ॥ २३ ॥
प्रभुप्रिया प्रभुरता प्रभुभक्तिप्रदायिनी ।
परतृष्णावर्धिनी च प्रचया परजन्मदा ॥ २४ ॥
परजन्मनिरस्ता च परसञ्चारकारिणी ।
परजाता पारिजाता पवित्रा पुण्यवर्धिनी ॥ २५ ॥
पापहर्त्री पापकोटिनाशिनी परमोक्षदा ।
परमाणुरता सूक्ष्मा परमाणुविभञ्जिनी ॥ २६ ॥
परमाणुस्थूलकरी परात्परतरा पथा ।
पूषणः प्रियकर्त्री च पूषणा पोषणत्रया ॥ २७ ॥
भूपपाला पाशहस्ता प्रचण्डा प्राणरक्षिणी ।
पयःशिलाऽपूपभक्षा पीयूषपानतत्परा ॥ २८ ॥
पीयूषतृप्तदेहा च पीयूषमथनक्रिया ।

पीयूषसागरोद्भूता पीयूषस्निग्धदोहिनी ॥ २९ ॥
पीयूषनिर्मलाकारा पीयूषघनविग्रहा ।
प्राणापानसमानादिपवनस्तम्भनप्रिया ॥ ३० ॥
पवनांशप्रभाकारा प्रेमोद्गतस्वभक्तिदा ।
पाषाणतनुसंस्था च पाषाणचित्तविग्रहा ॥ ३१ ॥
पश्चिमानन्दनिरता पश्चिमा पश्चिमप्रिया ।
प्रभाकारतनूग्रा च प्रभाकरमुखी प्रभा ॥ ३२ ॥
सुप्रभा प्रान्तरस्था च प्रेयत्वसाधनप्रिया ।
अस्थिता पामसी पूर्वनाथपूजितपादुका ॥ ३३ ॥
पादुकामन्त्रसिद्धा च पादुकामन्त्रजापिनी ।
पादुकामङ्गलस्था च पादुकाम्भोजराजिनी ॥ ३४ ॥
प्रभाभारुणकोटिस्था प्रचण्डसूर्यकोटिगा ।
पालयन्ती त्रिलोकानां परमा परहाकिनी ॥ ३५ ॥
परावराननना प्रज्ञा प्रान्तरान्तःप्रसिद्धिदा ।
पारिजातवनोन्मादा परमोन्मादरागिणी ॥ ३६ ॥
परमाह्लादमोदा च परमाकाशवाहिनी ।
परमाकाशदेवी च प्रथात्रिपुरसुन्दरी ॥ ३७ ॥
प्रतिकूलकरी प्राणानुकूलपरिकारिणी ।
प्राणरुद्रेश्वरप्रीता प्रचण्डगणनायिका ॥ ३८ ॥
पोष्ट्री पौत्रादिरक्षत्री पुण्ड्रका पञ्चचामरा ।
परयोषा परप्राया परसन्तानरक्षका ॥ ३९ ॥
परयोगिरता पाशपशुपाशविमोहिनी ।
पशुपाशप्रदा पूज्या प्रसादगुणदायिनी ॥ ४० ॥
प्रह्लादस्था प्रफुल्लाब्जमुखी परमसुन्दरी ।
परारामा परारामा पार्वणी पार्वणप्रिया ॥ ४१ ॥
प्रियङ्करी पूर्वमाता पालनाख्या परासरा ।
पराशरसुभाग्यस्था परकान्तिनितम्बिनी ॥ ४२ ॥
परश्मशानगम्या च प्रियचन्द्रमुखीपला ।
पलसानकरी प्लक्षा प्लवङ्गगणपूजिता ॥ ४३ ॥
प्लक्षस्था पल्लवस्था च पङ्केरुहमुखी पटा ।
पटाकारस्थिता पाद्या पवित्रलोकदायिनी ॥ ४४ ॥
पवित्रमन्त्रजाप्यस्था पवित्रस्थानवासिनी ।
पवित्रालङ्कृताङ्गी च पवित्रदेहधारिणी ॥ ४५ ॥
त्रिपुरा परमैश्वर्यपूजिता सर्वपूजिता ।
पलालप्रियहृद्या च पलालचर्वणप्रिया ॥ ४६ ॥
परगोगणगोप्या च प्रभुस्त्रीरौद्रतैजसी ।

प्रफुल्लाम्भोजवदना प्रफुल्लपद्ममालिनी ॥ ४७ ॥
पुष्पप्रिया पुष्पकुला कुलपुष्पप्रियाकुला ।
पुष्पस्था पुष्पसङ्काशा पुष्पकोमलविग्रहा ॥ ४८ ॥
पौष्पी पानरता पुष्पमधुपानरता प्रचा ।
प्रतीची प्रचयाह्लादो प्राचनाख्या च प्राञ्चिका ॥ ४९ ॥
परोदरे गुणानन्दा परौदार्यगुणप्रिया ।
पारा कोटिध्वनिरता पद्मसूत्रप्रबोधिनी ॥ ५० ॥
प्रियप्रबोधनिरता प्रचण्डनादमोहिनी ।
पीवरा पीवरग्रन्थिप्रभेदा प्रलयापहा ॥ ५१ ॥
प्रलया प्रलयानन्दा प्रलयस्था प्रयोगिनी ।
प्रयोगकुशला पक्षा पक्षभेदप्रकाशिनी ॥ ५२ ॥
एकपक्षा द्विपक्षा च पञ्चपक्षप्रसिद्धिदा ।
पलाशकुसुमानन्दा पलाशपुष्पमालिनी ॥ ५३ ॥
पलाशपुष्पहोमस्था पलाशच्छदसंस्थिता ।
पात्रपक्षा पीतवस्त्रा पीतवर्णप्रकाशिनी ॥ ५४ ॥
निपीतकालकूटी च पीतसंसारसागरा ।
पद्मपत्रजलस्था च पद्मपत्रनिवासिनी ॥ ५५ ॥
पद्ममाला पापहरा पट्टाम्बरधरा परा ।
परनिर्वाणदात्री च पराशा परशासना ॥ ५६ ॥
अप्रियविनिहन्त्री च परसंस्कारपालिनी ।
प्रतिष्ठा पूजिता सिद्धा प्रसिद्धप्रभुवादिनी ॥ ५७ ॥
प्रयाससिद्धिदा क्षुब्धा प्रपञ्चगुणनाशिनी ।
प्रणिपत्या प्राणिशिष्या प्रतिष्ठिततनूप्रिया ॥ ५८ ॥
अप्रतिष्ठा निहन्त्री च पादपद्मद्वयान्विता ।
पादाम्बुजप्रेमभक्तिपूज्यप्राणप्रदायिनी ॥ ५९ ॥
पैशाची च प्रक्षपिता पितृश्रद्धा पितामही ।
प्रपितामहपूज्या च पितृलोकस्वधापरा ॥ ६० ॥
पुनर्भवा पुनर्जीवा पौनःपुन्यगतिस्थिता ।
प्रधानबलिभक्षादिसुप्रिया प्रियसाक्षिणी ॥ ६१ ॥
पतङ्गकोटिजीवाख्या पावकस्था च पावनी ।
परज्ञानार्थदात्री च परतन्त्रार्थसाधिनी ॥ ६२ ॥
प्रत्यग्ज्योतिः स्वरूपा च प्रथमाप्रथमारुणा ।
प्रातःसन्ध्या पार्थसन्ध्या परसन्ध्यास्वरूपिणी ॥ ६३ ॥
प्रधानवरदा प्राणज्ञाननिर्णयकारिणी ।
प्रभञ्जना प्राञ्जनेशी प्रयोगोद्रेककारिणी ॥ ६४ ॥
प्रफुल्लपददात्री च प्रसमाया पुरोदया ।

पर्वतप्राणरक्षत्री पर्वताधारसाक्षिणी ॥ ६५ ॥
पर्वतप्राणशोभा च पर्वतच्छत्रकारिणी ।
पर्वता ज्ञानहर्त्री च प्रलयोदयसाक्षिणी ॥ ६६ ॥
प्रारब्धजननी काली प्रद्युम्नजननी सुरा ।
प्राक्सुरेश्वरपत्नी च परवीरकुलापहा ॥ ६७ ॥
परवीरनियन्त्री च परप्रणवमालिनी ।
प्रणवेशी प्रणवगा प्रणवाद्याक्षरप्रिया ॥ ६८ ॥
प्रणवार्णजपप्रीता प्राणमृत्युञ्जयप्रदा ।
प्रणवालङ्कृता व्यूढा पशुभक्षणतर्पणा ॥ ६९ ॥
पशुदोषहरा पाशुपतास्त्रकोटिधारिणी ।
प्रवेशिनी प्रवेशाख्या पद्मपत्त्रिलोचना ॥ ७० ॥
पशुमांसासवानन्दा पशुकोटिबलिप्रिया ।
पशुधर्मक्षया प्रार्या पशुतर्पणकारिणी ॥ ७१ ॥
पशुश्रद्धाकरी पूज्या पशुमुण्डसुमालिनी ।
परवीरयोगशिक्षा परसिद्धान्तयोगिनी ॥ ७२ ॥
परशुक्रोधमुख्यास्त्रा परशुप्रलयप्रदा ।
पद्मरागमालधरा पद्मरागासनस्थिता ॥ ७३ ॥
पद्मरागमणिश्रेणीहारालङ्कारशोभिता ।
परमधूलिसौन्दर्यमञ्जीरपादुकाम्बुजा ॥ ७४ ॥
हर्त्री समस्तदुःखानां हिरण्यहारशोभिता ।
हरिणाक्षी हरिस्था च हरा हारावती हिरा ॥ ७५ ॥
हारकुण्डलशोभाढ्या हारकेयूरमण्डिता ।
हरणस्था हाकिनी च होमकर्मप्रकाशिनी ॥ ७६ ॥
हरिद्रा हरिपूज्या च हरमाला हरेश्वरी ।
हरातीता हरसिद्धा ह्रींकारी हंसमालिनी ॥ ७७ ॥
हंसमन्त्रस्वरूपा च हंसमण्डलभेदिनी ।
हंसः सोऽहं मणिकरा हंसराजोपरिस्थिता ॥ ७८ ॥
हीरकाभा हीरकसूकधारिणी हरमेखला ।
हरकुण्डमेखला च होमदण्डसुमेखला ॥ ७९ ॥
हरधरप्रियानन्दा हलीशानी हरोदया ।
हरपत्नी हररता संहारविग्रहोज्ज्वला ॥ ८० ॥
संहारनिलया हाला ह्लींबीजप्रणवप्रिया ।
हलक्षा हक्षवर्णस्था हाकिनी हरमोहिनी ॥ ८१ ॥
हाहाहूहूप्रियानन्दगायनप्रेमसुप्रिया ।
हरभूतिप्रदा हारप्रिया हीरकमालिनी ॥ ८२ ॥
हीरकाभा हीरकस्था हराधारा हरस्थिता ।

हालानिषेविता हिन्ता हिन्तालवनसिद्धिदा ॥ ८३ ॥
महामाया महारौद्री महादेवनिषेविता ।
महानया महादेवी महासिद्धा महोदया ॥ ८४ ॥
महायोगा महाभद्रा महायोगेन्द्रतारिणी ।
महादीपशिखाकारा महादीपप्रकाशिनी ॥ ८५ ॥
महादीपप्रकाशाख्या महाश्रद्धा महामतिः ।
महामहीयसी मोहनाशिनी महती महा ॥ ८६ ॥
महाकालपूजिता च महाकालकुलेश्वरी ।
महायोगीन्द्रजननी मोहसिद्धिप्रदायिनी ॥ ८७ ॥
आहुतिस्थाहुतिरता होतृवेदमनुप्रिया ।
हैयङ्गबीजभोक्त्री च हैयङ्गबीजसुप्रिया ॥ ८८ ॥
हे सम्बोधनरूपा च हे हेतोः परमात्मजा ।
हलनाथप्रिया देवी हिताहितविनाशिनी ॥ ८९ ॥
हन्त्री समस्तपापानां हलहेतुप्रदाप्रदा ।
हलहेतुच्छलस्था च हिलिहिलिप्रयागिनी ॥ ९० ॥
हुतासनमुखी शून्या हरिणी हरतन्त्रदा ।
हठात्कारगतिप्रीता सुण्टकालङ्कृता इला ॥ ९१ ॥
हलायुधाद्यजननी हिल्लोला हेमबर्हीणी ।
हैमी हिमसुता हेमपर्वतशृङ्गसंस्थिरा ॥ ९२ ॥
हरणाख्या हरिप्रेमवर्धिनी हरमोहिनी ।
हरमाता हरप्रज्ञा हुङ्कारी हरपावनी ॥ ९३ ॥
हेरम्बजननी हट्टमध्यस्थलनिवासिनी ।
हिमकुन्देन्दुधवला हिमपर्वतवासिनी ॥ ९४ ॥
होतृस्था हरहाला च हेलातीता अहर्गणा ।
अहङ्कारा हेतुगर्ता हेतुस्था हितकारिणी ॥ ९५ ॥
हतभाग्यनिहन्त्री च हतासद्बुद्धिजीविका ।
हेतुप्रिया महारात्री अहोराख्या हरोद्गमा ॥ ९६ ॥
अर्हणादिप्रिया चार्हा हाहाकारनिनादिनी ।
हनुमत्कल्पसंस्थाना हनुमत्सिद्धिदायिनी ॥ ९७ ॥
हलाहलप्रियाघोरा महाभीमा हलायुधा ।
ह्सौः बीजस्वरूपा च ह्सौं प्रेताख्यजापिनी ॥ ९८ ॥
आह्लादिनी इहानन्दा अर्घ्यक्रान्ता हरार्चना ।
हरभीतिहराहःका बीजहःकामहक्षरा ॥ ९९ ॥
हेरम्बयोगसिद्धिस्था हेरम्बादिसुतप्रिया ।
हननाख्या हेतुनाम्नी हठात् सिद्धिप्रयोगदा ॥ १०० ॥
उमा महेश्वरी आद्या अनन्तानन्तशक्तिदा ।

आधाराईसुरक्षा च ईश्वरी उग्रतारिणी ॥ १०१ ॥
उषेश्वरी उत्तमा च ऊर्ध्वपद्मविभेदिनी ।
ऋद्धिसिद्धिप्रदा क्षुल्लाकाशबीजसुसिद्धिदा ॥ १०२ ॥
तृतकस्थातृतकस्था तृस्वराखर्वबीजगा ।
एरण्डपुष्पहोमाद्या ऐश्वर्यदानतत्परा ॥ १०३ ॥
ओड्रपुष्पप्रिया ॐकाराक्षरा औषधप्रिया ।
अर्वणासारः अंशाख्या अःस्था च कपिला कला ॥ १०४ ॥
कैलासस्था कामधेनुः खर्वा खेटकधारिणी ।
खरपुष्पप्रिया खड्गधारिणी खरगामिनी ॥ १०५ ॥
गभीरा गीतगायत्री गुर्वा गुरुतरा गया ।
घनकोटिनादकरी घर्घरा घोरनादिनी ॥ १०६ ॥
घनच्छाया चारुवर्णा चण्डिका चारुहासिनी ।
चारुचन्द्रमुखी चारुचित्तभावार्थगामिनी ॥ १०७ ॥
छत्राकिनी छलच्छिन्ना छागमांसविनोदिनी ।
जयदा जीवी जन्या च जीमूतैरुपशोभिता ॥ १०८ ॥
जयित्री जयमुण्डाली झङ्कारी झञ्जनादिका ।
टङ्कारधारिणी टङ्कबाणकार्मुकधारिणी ॥ १०९ ॥
ठकुराणी ठठङ्कारी डामरेशी च डिण्डिमा ।
ढक्कानादप्रिया ढक्का तवमाला तलातला ॥ ११० ॥
तिमिरा तारिणी तारा तरुणा तालसिद्धिदा ।
तृप्ता च तैजसी चैव तुलनातलवासिनी ॥ १११ ॥
तोषणा तौलिनी तैलगन्धामोदितदिङ्मुखी ।
स्थूलप्रिया थकाराद्या स्थितिरूपा च संस्थिरा ॥ ११२ ॥
दक्षिणदेहनादाक्षा दक्षपत्नी च दक्षजा ।
दारिद्र्यदोषहन्त्री च दारुणास्त्रविभञ्जिनी ॥ ११३ ॥
दंष्ट्रकरालवदनी दीर्घमात्रादलान्विता ।
देवमाता देवसेना देवपूज्या दयादशा ॥ ११४ ॥
दीक्षादानप्रदा दैन्यहन्त्री दीर्घसुकुन्तला ।
दनुजेन्द्रनिहन्त्री च दनुजारिविमर्दिनी ॥ ११५ ॥
देशपूज्या दायदात्री दशनास्त्रप्रधारिणी ।
दासरक्षा देशरक्षा दिगम्बरदिगम्बरी ॥ ११६ ॥
दिक्प्रभापाटलव्याप्ता दरीगृहनिवासिनी ।
दर्शनस्था दार्शनिका दत्तभार्या च दुर्गहा ॥ ११७ ॥
दुर्गा दीर्घमुखी दुःखनाशिनी दिविसंस्थिता ।
धन्या धनप्रदा धारा धरणी धारिणी धरा ॥ ११८ ॥
धृतसौन्दर्यवदना धनदा धान्यवर्धिनी ।

ध्यानप्राप्ता ध्यानगम्या ध्यानज्ञानप्रकाशिनी ॥ ११९ ॥
ध्येया धीरपूजिता च धूमेशी च धुरन्धरा ।
धूमकेतुहरा धूमा ध्येया सर्वसुरेश्वरई ॥ १२० ॥
धर्मार्थमोक्षदा धर्मचिन्ता धर्मप्रकाशिनी ।
धूलिरूपा च धवला धवलच्छत्रधारिणी ॥ १२१ ॥
धवलाम्बरधात्री च धवलासनसंस्थिता ।
धवला हिमालयधरा धरणी साधनक्रिया ॥ १२२ ॥
धवलेश्वरकन्या च धवलाध्वाधलामुखी ।
धीरकन्या धर्मकन्या ध्रुवसिद्धिप्रदायिनी ॥ १२३ ॥
ध्रुवानन्दा ध्रुवश्रद्धा ध्रुवसन्तोषवर्धिनी ।
नारिकेलजलस्नाता नारिकेलफलासना ॥ १२४ ॥
नारी नारायणीशाना नम्रपूजनसुप्रिया ।
नरदेवरता नित्यगणगन्धर्वपूजिता ॥ १२५ ॥
नरकविहारिणी चैव नरकान्तककारिणी ।
नरक्षेत्रकलादेवी नवकोशनिवासिनी ॥ १२६ ॥
नाक्षत्रविद्या नाक्षत्री नक्षत्रमण्डलस्थिता ।
नृपोन्नाशकरी नारायणी नूपुरधारिणी ॥ १२७ ॥
नृत्यगीतप्रियानीता नवीना नामशायिनी ।
नौनूतनास्त्रधरा नित्या नवपुष्पवनस्थिता ॥ १२८ ॥
नवपुष्पप्रेमरता नवचम्पकमालिनी ।
नवरत्नहारमाला नवजाम्बूनदप्रभा ॥ १२९ ॥
नमस्कारप्रिया निन्दा वादनादप्रणाशिनी ।
पवनाक्षरमाला च पवनाक्षरमालिनी ॥ १३० ॥
परदोषभयङ्कारा प्रचरद्रूपसंस्थिता ।
प्रस्फुटिताम्भोजमालाधारिणी प्रेमवासिनी ॥ १३१ ॥
परमानन्दसप्तानहरी पृथुनितम्बिनी ।
प्रवालमाला लोभाङ्गी पयोदा शतविग्रहा ॥ १३२ ॥
पयोदकरुणाकारा पारम्पर्याप्रसादिनी ।
प्रारम्भकर्मनिरता प्रारब्धभोगदायिनी ॥ १३३ ॥
प्रेमसिद्धिकरी प्रेमधारा गङ्गाम्बुशोभिनी ।
फेरुपुण्यवरानन्दा फेरुभोजनतोषिणी ॥ १३४ ॥
फलदा फलवर्धा च फलाह्लादविनोदिनी ।
फणिमालाधरा देवी फणिहारादिशोभिनी ॥ १३५ ॥
फणा फणीकारमुखी फणस्था फणिमण्डला ।
सहस्रफणिसम्प्राप्ता फुल्लारविन्दमालिनी ॥ १३६ ॥
वासुकी व्यासपूज्या च वासुदेवार्चनप्रिया ।

वासुदेवकलावाच्या वाचकस्था वसुस्थिता ॥ १३७ ॥
वज्रदण्डधराधारा विरदा वादसाधिनी ।
वसन्तकालनिलया वसोर्द्धारा वसुन्धरा ॥ १३८ ॥
वेपमानरक्षका च वपूरक्षा वृषासना ।
विवस्वत्प्रेमकुशला विद्यावाद्यविनोदिनी ॥ १३९ ॥
विधिविद्याप्रकाशा च विधिसिद्धान्तदायिनी ।
विधिज्ञा वेदकुशला वेदवाक्यविवासिनी ॥ १४० ॥
बलदेवपूजिता च बालभावप्रपूजिता ।
बाला वसुमती वेद्या वृद्धमाता बुधप्रिया ॥ १४१ ॥
बृहस्पतिप्रिया वीरपूजिता बालचन्द्रिका ।
विग्रहज्ञानरक्षा च व्याघ्रचर्मधरावरा ॥ १४२ ॥
व्यथाबोधापहन्त्री च विसर्गमण्डलस्थिता ।
बाणभूषापूजिता वनमाला विहायसी ॥ १४३ ॥
वामदेवप्रिया वामपूजाजापपरायणा ।
भद्रा भ्रमरवर्णा च भ्रामरी भ्रमरप्रभा ॥ १४४ ॥
भालचन्द्रधरा भीमा भीमनेत्राभवाभवा ।
भीममुखी भीमदेहा भीमविक्रमकारिणी ॥ १४५ ॥
भीमश्रद्धा भीमपूज्या भीमाकारातिसुन्दरी ।
भीमसङ्ग्रामजयदा भीमाद्या भीमभैरवी ॥ १४६ ॥
भैरवेशी भैरवी च सदानन्दादिभैरवी ।
सदानन्दभैरवी च भैरवेन्द्रप्रियङ्करी ॥ १४७ ॥
भल्लास्त्रधारिणी भैमी भृगुवंशप्रकाशिनी ।
भर्गपत्नी भर्गमाता भङ्गस्था भङ्गभक्षिणी ॥ १४८ ॥
भक्षप्रिया भक्षरता भृकुण्डा भावभैरवी ।
भावदा भवदा भावप्रभावा भावनाशिनी ॥ १४९ ॥
भालसिन्दूरतिलका भाललोकसुकुण्डला ।
भालमालालकाशोभा भासयन्ती भवार्णवा ॥ १५० ॥
भवभीतिहरा भालचन्द्रमण्डलवासिनी ।
मद्भ्रमरनेत्राब्जसुन्दरी भीमसुन्दरी ॥ १५१ ॥
भजनप्रियरूपा च भावभोजनसिद्धिदा ।
भ्रूचन्द्रनिरता बिन्दुचक्रभ्रूपद्मभेदिनी ॥ १५२ ॥
भवपाशहरा भीमभावकन्दनिवासिनी ।
मनोयोगसिद्धिदात्री मानसी मनसो मही ॥ १५३ ॥
महती मीनभक्षा च मीनचर्वणतत्परा ।
मीनावतारनिरता मांसचर्वणतत्परा ॥ १५४ ॥
मांसप्रिया मांससिद्धा सिद्धमांसविनोदिनी ।

माया महावीरपूज्या मधुप्रेमदिगम्बरी ॥ १५५ ॥
माधवी मदिरामध्या मधुमांसनिषेविता ।
मीनमुद्राभक्षिणी च मीनमुद्रापतर्पिणी ॥ १५६ ॥
मुद्रामैथुनसंतृप्ता मैथुनानन्दवर्धिनी ।
मैथुनज्ञानमोक्षस्था महामहिषमर्दिनी ॥ १५७ ॥
यज्ञश्रद्धा योगसिद्धा यत्नी यत्नप्रकाशिनी ।
यशोदा यशसि प्रीता यौवनस्था यमापहा ॥ १५८ ॥
रासश्रद्धातुरारामरमणीरमणप्रिया ।
राज्यदा रजनीराजवल्लभा रामसुन्दरी ॥ १५९ ॥
रतिश्चारतिरूपा च रुद्रलोकसरस्वती ।
रुद्राणी रणचामुण्डा रघुवंशप्रकाशिनी ॥ १६० ॥
लक्ष्मीर्लीलावती लोका लावण्यकोटिसम्भवा ।
लोकातीता लक्षणाख्या लिङ्गधारा लवङ्गदा ॥ १६१ ॥
लवङ्गपुष्पनिरता लवङ्गतरुसंस्थिता ।
लेलिहाना लयकरी लीलादेहप्रकाशिनी ॥ १६२ ॥
लाक्षाशोभाधरा लङ्का रत्नमासवधारिणी ।
लक्षजापसिद्धिकरी लक्षमन्त्रप्रकाशिनी ॥ १६३ ॥
वशिनी वशकर्त्री च वश्यकर्मनिवासिनी ।
वेशावेश्या वेशवेश्या वंशिनी वंशवर्धिनी ॥ १६४ ॥
वंशमाया वज्रशब्दमोहिनी शब्दरूपिणी ।
शिवा शिवमयी शिक्षा शशिचूडामणिप्रभा ॥ १६५ ॥
शवयुग्मभीतिदा च शवयुग्मभयानका ।
शवस्था शववक्षस्था शाब्दबोधप्रकाशिनी ॥ १६६ ॥
षट्पद्मभेदिनी षड्का षड्कोणयन्त्रमध्यगा ।
षट्चक्रसारदा सारा सारात्सारसरोरुहा ॥ १६७ ॥
समनादिनिहन्त्री च सिद्धिदा संशयापहा ।
संसारपूजिता धन्या सप्तमण्डलसाक्षिणी ॥ १६८ ॥
सुन्दरी सुन्दरप्रीता सुन्दरानन्दवर्धिनी ।
सुन्दरास्या सुनवस्त्री सौन्दर्यसिद्धिदायिनी ॥ १६९ ॥
त्रिसुन्दरी सर्वरी च सर्वा त्रिपुरसुन्दरी ।
श्यामला सर्वमाता च सख्यभावप्रिया स्वरा ॥ १७० ॥
साक्षात्कारस्थिता साक्षात्साक्षिणी सर्वसाक्षिणी ।
हाकिनी शाकिनीमाता शाकिनी काकिनीप्रिया ॥ १७१ ॥
हाकिनी लाकिनीमाता हाकिनी राकिणीप्रिया ।
हाकिनी डाकिनीमाता हरा कुण्डलिनी हया ॥ १७२ ॥
हयस्था हयतेजःस्था ह्सौंबीजप्रकाशिनी ।

लवणाम्बुस्थिता लक्षग्रन्थिभेदनकारिणी ॥ १७३ ॥
लक्षकोटिभास्कराभा लक्षब्रह्माण्डकारिणी ।
क्षणदण्डपलाकारा क्षपाक्षोभविनाशिनी ॥ १७४ ॥
क्षेत्रपालादिवटुकगणेशयोगिनीप्रिया ।
क्षयरोगहरा क्षौणी क्षालनस्थाक्षरप्रिया ॥ १७५ ॥
क्षाद्यस्वरान्तसिद्धिस्था क्षादिकान्तप्रकाशिनी ।
क्षाराम्बुतिक्तनिकरा क्षितिदुःखविनाशिनी ॥ १७६ ॥
क्षुन्निवृत्तिः क्षणज्ञानी वल्लभा क्षणभङ्गुरा ।
इत्येतत् कथितं नाथ हाकिन्याः कुलशेखर ॥ १७७ ॥
सहस्रनामयोगाङ्गमष्टोत्तरशतान्वितम् ।
यः पठेन्नियतः श्रीमान् स योगी नात्र संशयः ॥ १७८ ॥
अस्य स्मरणमात्रेण वीरो योगेश्वरो भवेत् ।
अस्यापि च फलं वक्तुं कोटिवर्षशतैरपि ॥ १७९ ॥
शक्यते नापि सहसा संक्षेपात् शृणु सत्फलम् ।
आयुरारोग्यमाप्नोति विश्वासं श्रीगुरोः पदैः ॥ १८० ॥
सारसिद्धिकरं पुण्यं पवित्रं पापनाशनम् ।
अत्यन्तदुःखदहनं सर्वसौभाग्यदायकम् ॥ १८१ ॥
पठनात् सर्वदा योगसिद्धिमाप्नोति योगिराट् ।
देहसिद्धिः काव्यसिद्धिर्ज्ञानसिद्धिर्भवेद् ध्रुवम् ॥ १८२ ॥
वाचां सिद्धिः खड्गसिद्धिः खेचरत्वमवाप्नुयात् ।
त्रैलोक्यवल्लभो योगी सर्वकामार्थसिद्धिभाक् ॥ १८३ ॥
अप्रकाश्यं महारत्नं पठित्वा सिद्धिमाप्नुयात् ।
अस्य प्रपठनेनापि भ्रूपद्मे चित्तमर्पयन् ॥ १८४ ॥
यशोभाग्यमवाप्नोतिराजराजेश्वरो भवेत् ।
डाकिनीसिद्धिमाप्नोति कुण्डलीवशमानयेत् ॥ १८५ ॥
ध्यानात्मा साधकेन्द्रश्च यतिर्भूत्वा शुभे दिने ।
ध्यानं कुर्यात् पद्ममध्यकर्णिकायां शिखालये ॥ १८६ ॥
भ्रूमध्ये चक्रसारे च ध्यात्वा ध्यात्वा पठेद् यदि ।
राकिणीसिद्धिमाप्नोति देवतादर्शनं लभेत् ॥ १८७ ॥
भाग्यसिद्धिमवाप्नोति नित्यं प्रपठनाद्यतः ।
साक्षात्सिद्धिमवाप्नोति शक्तियुक्तः पठेद्यदि ॥ १८८ ॥
हिरण्याक्षी लाकिनीशा वशमाप्नोति धैर्यवान् ।
रात्रिशेषे समुत्थाय पठेद् यदि शिवालये ॥ १८९ ॥
पूजान्ते वा जपान्ते वा वारमेकं पठेद्यदि ।
वीरसिद्धिमवाप्नोति काकिनीवशमानयेत् ॥ १९० ॥
रात्रिं व्याप्य पठेद्यस्तु शुद्धचेता जितेन्द्रियः ।

शय्यायां चण्डिकागेहे मधुगेहेऽथवा पुनः ॥ १९१ ॥
शाकिनीसिद्धिमाप्नोति सर्वदेशे च सर्वदा ।
प्रभाते च समुत्थाय शुद्धात्मा पञ्चमे दिने ॥ १९२ ॥
अमावास्यासु विज्ञायां श्रवणायां विशेषतः ।
शुक्लपक्षे नवम्यां तु कृष्णपक्षेऽष्टमीदिने ॥ १९३ ॥
भार्यायुक्तः पठेद्यस्तु वशमाप्नोति भूपतिम् ।
एकाकी निर्जने देशे कामजेता महाबली ॥ १९४ ॥
प्रपठेद् रात्रिशेषे च स भवेत् साधकोत्तमः ।
कल्पद्रुमसमो दाता देवजेता न संशयः ॥ १९५ ॥
शिवशक्तिमध्यभागे यन्त्रं संस्थाप्य यत्नतः ।
प्रपठेत् साधकेन्द्रश्च सर्वज्ञाता स्थिराशयः ॥ १९६ ॥
एकान्तनिर्जने रम्ये तपःसिद्धिफलोदये ।
देशे स्थित्वा पठेद्यस्तु जीवन्मुक्ति फलं लभेत् ॥ १९७ ॥
अकालेऽपि सकालेऽपि पठित्वा सिद्धिमाप्नुयात् ।
त्रिकालं यस्तु पठति प्रान्तरे वा चतुष्पथे ॥ १९८ ॥
योगिनीनां पतिः साक्षादायुर्वृद्धिर्दीने दिने ।
वारमेकं पठेद्यस्तु मूर्खो वा पण्डितोऽपि वा ॥ १९९ ॥
वाचामीशो भवेत् क्षिप्रं योगयुक्तो भवेद् ध्रुवम् ।
सम्भावितो भवेदेकं वारपाठेन भैरव ॥ २०० ॥
जित्वा कालमहामृत्युं देवीभक्तिमवाप्नुयात् ।
पठित्वा वारमेकं तु यात्रां कुर्वन्ति ये जनाः ॥ २०१ ॥
देवीदर्शनसिद्धिञ्च प्राप्तो योगमवाप्नुयात् ।
प्रत्येकं नाममुच्चार्य यो यागमनुसञ्चरेत् ॥ २०२ ॥
स भवेन्मम पुत्रो हि सर्वकामफलं लभेत् ।
सर्वयज्ञफलं ज्ञानसिद्धिमाप्नोति योगिराट् ॥ २०३ ॥
भूतले भूभृतांनाथो महासिद्धो महाकविः ।
कण्ठे शीर्षे दक्षभुजे पुरुषो धारयेद्यदि ॥ २०४ ॥
योषिद्वामभुजे धृत्वा सर्वसिद्धिमवाप्नुयात् ।
गोरोचनाकुङ्कुमेन रक्तचन्दनकेन च ॥ २०५ ॥
यावकैर्वा महेशानि लिखेन्मन्त्रं समाहितः ।
आद्या देवी परप्राणसिद्धिमाप्नोति निश्चितम् ॥ २०६ ॥
लिङ्गं पीठे पूर्णिमायां कृष्णचतुर्दशीदिने ।
भौमवारे मध्यरात्रौ पठित्वा कामसिद्धिभाक् ॥ २०७ ॥
किं न सिद्ध्यति भूखण्डे अजरामर एव सः ।
रमणीकोटिभर्ता स्याद् वर्षद्वादशपाठतः ॥ २०८ ॥
अष्टवर्षप्रपाठेन कायप्रवेशसिद्धिभाक् ।

षड्वर्षमात्रपाठेन कुबेरसदृशो धनी ॥ २०९ ॥
वारैकमात्रपाठेन वर्षे वर्षे दिने दिने ।
स भवेत् पञ्चतत्त्वज्ञो तत्त्वज्ञानी न संशयः ॥ २१० ॥
सर्वपापविनिर्मुक्तो वसेत् कल्पत्रयं भुवि ।
यः पठेत् सप्तधा नाथ सप्ताहनि दिने दिने ॥ २११ ॥
रात्रौ वारत्रयं धीमान् पठित्वा खेचरो भवेत् ।
अश्विनी शुक्लपक्षे च रोहिण्यसितपक्षके ॥ २१२ ॥
अष्टम्यां हि नवम्यां तु पठेद् वारत्रयं निशि ।
दिवसे वारमेकं तु स भवेत् पञ्चतत्त्ववित् ॥ २१३ ॥
अनायासेन देवेश पञ्चामरादिसिद्धिभाक् ।
खेचरीमेलनं तस्य नित्यं भवति निश्चितम् ॥ २१४ ॥
स्वर्गे मर्त्ये च पाताले क्षणान्निःसरति ध्रुवम् ।
अग्निस्तम्भं जलस्तम्भं वातस्तम्भं करोति सः ॥ २१५ ॥
पञ्चतत्त्वक्रमेणैव श्मशाने यस्तु सम्पठेत् ।
स भवेद् देवदेवेशः सिद्धान्तसारपण्डितः ॥ २१६ ॥
शूकरासवसंयुक्तः कुलद्रव्येण वा पुनः ।
बिल्वमूले पीठमूले विधानेन प्रपूजयेत् ।
परेण परमा देवी तुष्टा भवति सिद्धिदा ॥ २१७ ॥

॥ इति श्रीरुद्रयामले उत्तरतन्त्रे भैरवभैरवीसंवादे
हाकिनीसहस्रनामस्तोत्रं सम्पूर्णम् ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

Please send corrections to sanskrit@cheerful.com
Last updated May 25, 2009
http://sanskritdocuments.org